अगस्त तः सितम्बर २०२४ पर्यन्तम्

श्रावणकृष्णद्वादशी तः आश्विनकृष्णत्रयोदशी पर्यन्तम्

(वै-२०८१)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

### काव्यविशेषाङ्कः

वर्षम्-१२ संयुक्ताङ्कः-१-२

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

**एक साहित्यिक त्रैमासिक शोध पत्रिका**
**एवं**
**समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति**
**तथा**
**सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति**

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन–2278–8360)

**संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मञ्जरी"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अगस्त तः सितम्बर
२०२४ पर्यन्तम्
काव्यविशेषाङ्क
वर्षम्-१२-संयुक्ताङ्कः-१-२
(वै.-२०८१)
(श्रावण-कृष्ण-द्वादशी तः आश्विन-कृष्ण-त्रयोदशी पर्यन्तम्)

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोजकुमारः

टंकण/आवरण/सज्जा
पूजागड़ाकोटी


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | तं भारतं देशं भजे | डॉ. राजकुमारमिश्रः ''कुमारः'' | १ |
| ३. | मृत्तिका चन्दनं मृत्तिका चन्दनम् | प्रो. के.सी.त्रिपाठी | ३ |
| ४. | अभिनवभारतं प्रति | डॉ. परमानन्द झा | ५ |
| ५. | भारतप्रबोधनम् | डॉ. दयालसिंह पँवारः | ७ |
| ६. | राजलक्ष्मी-स्वयंवरः | '' | ८ |
| ७. | विभाजनविभीषिका | प्रो. भागीरथी नन्दः | १० |
| ८. | तान् स्मरामः | डॉ. आशुतोषमाथुरः | १२ |
| ९. | मातृसपर्या | '' | १२ |
| १०. | स्वातन्त्र्यम् | '' | १३ |
| ११. | प्रेमविवाहः | '' | १४ |
| १२. | चलध्वनिः | डॉ. अञ्जू रानी | १५ |
| १३. | भारतेभूमे! तव जयगानम् | डॉ. सर्वेशकुमारमिश्रः | १७ |
| १४. | वासुदेवप्रसादः | डॉ. ऋषिराजपाठकः | १९ |
| १५. | द्विजराजः | डॉ. युवराजः भट्टराई | २१ |


दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹ 25 रूप्यकाणि

वार्षिकम् : ₹ 250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः अन्तरर्जालमाध्यमेन (online) अथवा सी०टी०सी० चैक माध्यमेन

(दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरभारतीसमुपका: सुहृदया:!**

भारतं ७८तमं स्वातन्त्र्यदिवसम् आचरति। स्वातन्त्र्यं कस्यापि बाह्यनियन्त्रणात् वा बाध्यताया: वा मुक्तत्वं भवति। स्वातन्त्र्यस्य मूल्यं ते एवावगन्तुं शक्नुवन्ति ये तस्य प्राप्त्यर्थं बहुकालं संघर्षं कृतवन्त:। प्रत्येकं जन: तस्य महत्त्वं अवगत्य सर्वेषां स्वतन्त्रताया: अधिकारस्य आदरं च कुर्यात्। दिल्लीसंस्कृताकादम्या: मासिकीबालपत्रिकायां संस्कृतचन्द्रिकायां बालमनोनुकूला: रुचिवर्धका: उत्तमा: रचना: प्रकाश्यन्ते। संस्कृताध्येतॄणां विद्यार्थीनाञ्च समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकाया: द्वादशतमवर्षस्य अगस्तत: सितम्बर २०२४ पर्यन्तं प्रकाशित: संयुक्तांक: (१-२) समुपस्थाप्यते। संयुक्तांकोऽयं स्वातन्त्र्यकाव्यविशेषांक:। संयुक्तांकेऽस्मिन् डॉ. दयालसिंहपंवार-महोदयानां, डॉ. आशुतोषदयालमाथुरमहोदयानां, प्रो.के.सी.त्रिपाठिमहोदयानां, डॉ. परमानन्दझा-महोदयानां, प्रो. भागीरथीनन्दमहोदयानां, डॉ. राजकुमारमिश्रमहोदयानां, डॉ. अंजू रानीमहोदयानां, डॉ. ऋषिराजपाठकमहोदयानां, डॉ. सर्वेशकुमारमिश्रमहोदयानां तथा च डॉ. युवराजभट्टराईमहोदयानां स्वातन्त्र्याधारिता: काव्यरचना: प्रकाशिता:। यन्न केवलं भारतस्य गौरवं वर्धयन्ति अपितु पाठकानां मनसि स्वातन्त्र्यस्य भाव: अपि सुदृढं कुर्वन्ति। आशासे बालपत्रिकेयं बालकै: सोत्साहं पठिष्यत इति।

**शकाब्द: - १९४६**

**भावत्क:**
**डॉ. अरुणकुमारझा**
**सचिव:**

# तं भारतं देशं भजे

-डॉ. राजकुमारमिश्रः 'कुमारः'

लोके सहिष्णुतया स्वया ख्यातो गुणैर्यो वन्दितः
सद्भावनासद्व्याहृतिप्रकृतिप्रभाभिर्नन्दितः।
वर्धिष्णुतादिव्याभया यो जातु नाऽभून्मन्दितः
पथ्योद्यतं भक्त्या निजं तं भारतं देशं भजे ॥१॥
यो विश्ववारां संस्कृतिं प्रथमां दधानो राजते
तत्त्वं ह्यतत्त्वं चक्षुषा मित्रस्य यश्च समीक्षते।
विश्वाय विश्वस्मै सदा यो धर्ममार्गं बोधते
बहुभा-रतं स्वमनारतं तं भारतं देशं भजे ॥२॥
जातिः स्थिताऽस्त्येका परं देशान्तरं युद्धोद्यतं
कस्मादिदं राष्ट्रं पुनः सञ्जायतेऽक्षतमुन्नतम्।
वैदेशिकोऽपि विलोकते यस्य स्थिरं विभवं ततं
संस्कारसंस्कृतिसंस्कृतं तं भारतं देशं भजे ॥३॥



* * * * * *

यत्र सत्यं शिवं सुन्दरं राजते
यत्र धर्मो नरीनृत्यते प्रत्यहम्।
यत्र रम्या कथा दिव्यरामायणी
संस्कृताप्लावितं भारतं तद् भजे ॥१॥
वीरपूजा सदा काव्यधारा तथा
सैनिकास्तत्परा देशसंरक्षणे।
मातृभूमिं नमत्सज्जनानां गणः
तन्नुमो भारतं धीरवीरान्वितम् ॥२॥
नित्यपीयूषपानप्रियास्तेऽमरा
आमनन्तीव नाकस्य निस्सारताम्।
सत्कथायाः सुधायाः कृते मेदिनी-
माश्रयन्ते सदा भारताख्यामहो ॥३॥

यत्र काशी पवित्रा प्रिया राजते
मन्दिराणां चयः सर्वतः शोभते।
आगरानगरं ताजहर्म्यं महद्
दिव्यकाश्मीरभूः स्वर्गभूषायते।। ४ ।।
वेदशास्त्रादिकं ज्ञानमूलं मतं
छन्दसामुच्चयः पद्यधाराश्रयः।
रम्यरम्या कवीनां सुकाव्यच्छटा
राजते भारते भावनोद्यद्छटा।।५।।



-सहाचार्यः साहित्यविभागः,
हरियाणासंस्कृतविद्यापीठम्,
बघौला, पलवलम्, हरियाणा-१२११०२



# मृत्तिका चन्दनं मृत्तिका चन्दनम्

-प्रो. के.सी.त्रिपाठी

यस्यगीतानि गायन्ति देवाः सदा
रक्षणार्थं च धेनोः स्वदेहार्पयत्
दृश्यते सर्वपन्थः समत्वेन च
मृत्तिकाचन्दनं मृत्तिकाचन्दनम् ।।

शत्रुविध्वंसने सज्जनान् रक्षणे
दीनहीनान्तथा पोषयत्सर्वदा
सर्वदेशेषु रत्नोपमं भारतम्
मृत्तिका चन्दनं मृत्तिका चन्दनम्।।

यत्र गंगानदी सर्वदा शोभते
सर्वकारश्च यूनां हिते तत्परः।
यत्र वीराः सदा देशरक्षारताः
मृत्तिका चन्दनं मृत्तिका चन्दनम् ।।

यत्र वृन्दावने राधिका राजते
यत्र काश्यां शिवः सर्वदा भ्राजते
यत्र कृष्णस्य गीता सदा पठ्यते
मृतिका चन्दनं मृत्तिका चन्दनम् ।।

यत्र केदारनाथः सदा शोभते
यत्र रामेश्वरं बद्रिधामो सदा
देहली द्वारिका चप्ययोध्यापुरी
मृत्तिका चन्दनं मृत्तिका चन्दनम् ।।

यत्र खाद्यान्नभाण्डं सदा पूरितम्
यत्र शस्यं सदा स्वर्णवद् दृश्यते
यत्र पीयूषतुल्यं जलं वर्तते
मृत्तिका चन्दनं मृत्तिका चन्दनम् ।।



यत्र नीरेषु मीनाः प्रसन्नाः सदा
वन्यजीवाश्च सिंहाः सदा दिग्गजैः
कोकिला वा शिखी वा शुको वा सदा
मृत्तिका चन्दनं मृत्तिका चन्दनम्।।

चन्द्रयानेन वा सूर्ययानेन वा
शत्रुभूतां धरां चापि दूरेस्थिताम्
नाशसामर्थ्यशाली स्वदेशो महान्
मृत्तिका चन्दनं मृत्तिका चन्दनम्।।

**-पूर्वाध्यक्षा आचार्यश्च**
**एन.सी.ई.आर.टी, देहली**

# अभिनवभारतं प्रति

- डॉ. परमानन्दः झा

अर्जितं स्वातन्त्र्यमस्मत्पूर्वजैः
ऊर्जितं कथमद्य तत् सम्पद्यताम् ।
योगभावः साधु तैरुपकल्पितः
साम्प्रतं क्षेमं कथं प्रतिपद्यताम् ।।

अये नवभारतभविष्यद्भास्कराः ।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।। १ ।।

स्वर्गतापि भगीरथेन कृपालुना
जाह्नवी नः सन्निधानं प्रापिता।
भेषजं भव्यं पुरस्ताद् भ्राजते
आतुरेभ्यः साधु कथमुपयुज्यताम् ।।

अये नवभारतभविष्यद्भास्कराः ।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।।२।।

सर्वहितसाधारणी मुनिकल्पिता
भारतीया नः पुराणी संस्कृतिः।
विश्वजनवन्द्या सदा सादरभरं
दूषणात् सम्प्रति कथं परिरक्ष्यताम् ।।

अये नवभारतभविष्यद्भास्कराः ।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।। ३।।



कालिदासव्यासभाससुबन्धुभिः
उज्ज्वलप्रतिभामयी सुयशस्करी।
भारतीया भारती याऽऽराधिता
सा पुनः कथमद्य साधु प्रसाद्यताम्।।

अये नवभारतभविष्यद्भास्कराः।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।। ४।।

सिद्धमुनियोगीश्वरादितपोबलैः
भारतेन पुराऽर्चनीयतमं हि यत्।
आसनं समलङ्कृतं जगतां गुरोः
तत् कथं सम्प्रति च पुनरारुह्यताम्।।
अये नवभारतभविष्यद्भास्कराः ।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।। ५ ।।



जन्मभूविपदावलीमपनेतृभिः
नेतृभिः गान्धीसुभाषजवाहरैः।
वीक्षितः स्वप्नो भुवो मधुरश्चिरात्
सत्वरं कथमद्य रूपे राजताम्।।
अये नवभारतभविष्यद्भास्कराः ।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।। ६।।

भिन्नधर्मसमाजपद्धतिशालिनां
साधु सद्भावाभिवृद्धयर्थं नृणाम्।
लोकतन्त्रं प्राक्तनैः परिकल्पितं
पूर्णलक्ष्यं चाशु कथमुपजायताम्।।
अये नवभारतभविष्यद्भास्कराः।
राष्ट्रगौरवरक्षणाय विचिन्त्यताम् ।।७।।

- फ्लैट सं.-१११, शाकुन्तलम् अपार्टमेण्ट्स
भूखण्ड संख्या-१६, सैक्टर-१०,
द्वारका, नव देहली-७५

# भारतप्रबोधनम्

-प्रो. दयालसिंह पँवारः

अहो गता तमोमयी निशा नवप्रभातमेतदागतम्,
दिक्षु दिक्षु रविमरीचिकाः प्रबोधयन्ति भव्यभारतम्।
रामकृष्णवंशजा वयं सम्मुखे च विश्वमपि नतम्;
पुनः पुनर्विचिन्त्यतां समैः पारतन्त्र्यमागतं कथम्?
परस्परं विभाजिता वयं राष्ट्रमेव नस्ततः क्षतम्;
दिक्षु दिक्षु रविमरीचिकाः प्रबोधयन्ति भव्यभारतम्।
सर्वथा समैश्च त्यज्यतां जातिवर्गभेदभावना;
यत्नतस्सदा विधीयतां राष्ट्रमङ्गलस्य साधना।
पुनरपि श्रमेण प्राप्यतां राष्ट्र-वैभवं तु यद्गतम्;
दिक्षु दिक्षु रविमरीचिकाः प्रबोधयन्ति भव्यभारतम्।
मातृभूमिमङ्गलाय ये गृहं विहाय साधनारताः;
स्वतन्त्रामहाध्वरे च ये प्रदाय जीवनाहुतिं गताः।
स्मारं स्मारं सदैव तान् पालयेम तद्दृढव्रतम्;
दिक्षु दिक्षु रविमरीचिकाः प्रबोधयन्ति भव्यभारतम्।
समे भवन्तु राष्ट्रसेवकाः तुष्टिपुष्टिस्फूर्तिदायकाः
शुचिव्रतास्सदाचरणरता भवन्तु नव्यराष्ट्रनायकाः।
विश्वगुरुपदे प्रतिष्ठितं राष्ट्रमस्तु विश्वशुभरतम्:
दिक्षु दिक्षु रविमरीचिकाः प्रबोधयन्ति भव्यभारतम्।



# राजलक्ष्मी-स्वयंवरः

-प्रो. दयालसिंहपँवारः

किं यूनां प्रौढानामेषा
वृद्धानामपि गतिं बाधते;
इयं राजलक्ष्मीरस्माकं
पुनर्नवीनं पतिं याचते।
पञ्चवार्षिकावधिकीं बेलां
भद्रे! कथं सुबहु गणयन्ती;
राजश्रि! त्वं नैव लज्जसे
पुनर्नवीनं पतिं त्यजन्ती।
मधुचन्द्रिकां विना ते भाविनि! कथं रोचते पत्यस्त्यागः,
पुनरपि वर्धत एव जनानां
अहो! भृशं त्वां प्रत्यनुरागः।
यदा वीक्षसे सभ्रूभङ्गं
विद्युत्पातस्तदा जायते;
इयं राजलक्ष्मीरस्माकं
पुनर्नवीनं पतिं याचते।
स्वयंवरं त्वं रचयसि भद्रे!
पुनर्विहाय सुदूरं लज्जाम्,
तरुणो भवेद् भवेद् वा वृद्धो
सर्वाश्चात्र हि कुरुते सज्जाम्।
यद्यपि बहवः पतयस्त्यकताः
पुनश्च बहुवारं परिणीताः
किं भोस्त्वयि तादृशो विशेषः
इमे येन ते दासाः क्रीताः।
त्वत्स्वयंवर-चिकीर्षया भोः!
नेतृगणोऽयं लसति भारते;
इयं राजलक्ष्मीरस्माकं
पुनर्नवीनं पतिं याचते।



धन्यं धन्यं राजवल्लभे!
धन्यमिदं ते पातिव्रत्यम्;
पतिं कीदृशं वाञ्छसि भद्रे!
सकृदपि कथय कथय भोः सत्यम्।
चाकचकयचकितीकृतलोचन-स्वयंवरस्ते समागतोऽयम्;
हे सञ्चारिणि दीपशिखे! त्वं कं कं गमयसि विवर्णभावम्
वृद्धोऽसौ लभते तारुण्यं
योऽनुकम्प्यते यः सनाथ्यते;
इयं राजलक्ष्मीरस्माकं पुनर्नवीनं पतिं याचते।

**-आचार्यः, व्याकरणविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः**
**(केन्द्रीय विश्वविद्यालयः)**
**कटवरिया सरायः, नवदेहली-१६**

# विभाजनविभीषिका

-प्रो. भागीरथीनन्दः

अनेकगृहदेहलीपरिसरोऽत्र नग्नोऽथवा
प्रचण्डकरदण्डपातनवशाद् विभग्नोदरः।
निरीहरुधिरैर्नदी विरचिता च हिंस्रैर्न वा
र्विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।१।।

क्वचित्पदमहो क्वचित् करयुगं क्वचिज्जानुनी
क्वचिल्लुलितमूर्धजं मृतशिरः क्वचित् पञ्जरम्।
उपद्रवपरायणैरसिभिरेव लूनं वपु-
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।२।।



अयःशकटिकाऽश्रुभी रुधिरवर्षणैः पूरिता
पणीकृतसुबन्धुता स्वजनता हता विस्मृता ।
अखण्डधरणौ विखण्डनरवोऽपि चीत्कारजो
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।३।।

न कोऽपि जनको न काऽपि जननी न वा सोदरो
न काऽपि भगिनी न कोऽपि तनयो न कन्याऽथवा।
जनास्तु करवालपातनभयात् बलाद् द्राविता
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।४।।

इयं हि धरणिरखण्डितवपुर्द्वयोः प्रान्तयो-
र्महोदधिपदा हिमालयशिरा हरिद्विग्रहा।
कृता कमलयोनिना कतिपयैस्तु निर्मापिता
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।५।।

सुखं जनविभाजितं विततिमेति दुःखं परं
समानहृदयेषु याति कृशतामसह्यं क्षणात्।
परन्तु जननीस्वजन्मवसुधाशरीरप्रभा-
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।६।।

नदीजलमहाप्रवाहपरिमाणरोधोऽभवद्?
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।७।।

स्वदेशधरणौ स्वकीयमनुजा विपत्तिं गता
विसृष्टगृहजीविकापशुधनाश्च निष्पेषिताः।
भ्रमन्ति शरणार्थिनो शिविरसौधधूलौ हता
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।८।।

सुतापरिणयाहृते कनककङ्कणे दर्शयन्
सुतस्य लघुकन्दुकं करतले परामृश्य च।
पिता विलपति व्रणाङ्कितनुर्विदीर्णोऽसुतो
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।९।।

जरापलितमूर्धजा गलितचर्मशीर्णाऽक्षमा
नितान्तपरिदुर्बला नवतिपारवर्षायुषा।
अदृष्टिरपि शून्यवेश्मनि विसर्जिताऽम्बा बत
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।१०।।

पदार्थयुगभक्तिचन्द्रतमवत्सरे (१९४७) शासकैः
करस्खलितशासनैः खलु सिताङ्गवैदेशिकैः।
द्विधा व्यरचि देशमातृहृदयं प्रभेदच्छलाद्-
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।११।।

अनेकजनयन्त्रणा सहृदयत्वसंशोषणा
विनाशफणिभीषणा कपटजालसम्पोषणा।
प्रधानपदलाभलोभतरुरञ्जिका मल्लिका
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।। १२।।

गलद्रुधिरपङ्किले मलजले पिपासाशमं
क्षुधा शुनकसङ्कुलेऽन्नकवले विभागोद्यमम्।
विलोक्य हतमानवो विगतजीवनं संस्मरन्
विभाजनविभीषिका क्षतविवर्धिका साम्प्रतम् ।।१३।।

**- आचार्यः, साहित्य विभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः**
**( केन्द्रीय-विश्वविद्यालयः )**
**कटवरिया सरायः, नवदेहली-१६**

## तान् स्मरामः

-डॉ. आशुतोषमाथुरः

भूयो भूयः प्रखरमदमानादिभिर्हन्यमानान्।
हिंस्रानाङ्ग्लान् शमदमतपोभिर्हि ये स्वात्मसंस्थै-
र्जित्वा जित्वा सकलभुवने लब्धकीर्त्या विशिष्टाः।
स्वातन्त्र्यार्थं समरयजने प्राणदाँस्तान् स्मरामः ।।१।।

शीर्षोच्छेदैः रुधिरसरितो वेगवत्स्रोतसा यैः ।
खर्वैर्गर्वैर्जनिवसुमतीपादपूजाविधिर्यै-
र्हित्वा शोकं भयमथ मुदा पालितः श्रद्धया यै -
रज्ञाताख्यान् विस्मृतिकुहरे पातिताँस्तान् स्मरामः ।। २ ।।

## मातृसपर्या

शीर्षं हिमाद्रिशिखरैः कृतवारिसेकं धौतौ त्वदीयचरणौ जलधेर्जलौघैः ।
गाङ्गेयवारिरचिता तव कण्ठमाला मातर्नतास्तव चरेम वयं सपर्याम् ।। १ ।।

देशास्तु सन्ति बहवो विभवैरुपेता नानाविधप्रहरणैर्भयदा जनानाम् ।
स्नेहं दयां च करुणां हृदि धारयन्त्या मातर्नतास्तव चरेम वयं सपर्याम् ।। २।।

भाषाप्रयोगजनितैर्विविधैर्विकल्पैरेका यथा बहुलतां सुरगीः प्रयाता।
रूपप्रचारविधिभिर्बहुतां प्रपन्ने! मातर्नतास्तव चरेम वयं सपर्याम् ।।३।।

धर्षन्ति केचन सुतास्तव वामभागं सव्येतरं तव भुजं परिभूय चान्ये ।
द्वैधेन भिन्नतनुतापविदूषिताया मातर्नतास्तव चरेम वयं सपर्याम् ।।४।।

आचारशीलवसना स्मितिसौम्यरूपा विश्वैक्यदेशनपरा जगदेकवन्द्या।
आत्मीयपुत्रहतकैर्हतकेशवस्त्रा लज्जानतास्तव चरेम कथं सपर्याम् ।।५।।

# स्वातन्त्र्यम्

-डॉ. आशुतोषमाथुरः

विनाभ्यासं भवेद् वृत्तिर्विद्यां विना भवे-
दृवृत्तिकं भवेद् वित्तं स्वातन्त्र्यं परमं भवेत् ।। १ ।।

अत्यन्तं स्वातन्त्र्यं प्राप्तुं यतमानैः सर्वं हारितम्-
चित्रो लोकश्चित्रः कालः
न त्वं मे, नोऽहं ते बाले
नो नौ बाला
नो नौ बालः
चित्रो लोकश्चित्र कालः ।। २ ।।
सार्वजनिकोपक्रमाणां विक्रयं, निजोद्योगानां च प्रोत्साहनं वीक्ष्य कथ्यते -

अनुधावन्मृगं हैमं रामो सीतामहारयदपि-
स्वर्णमयीं लङ्कां सीतामिच्छन् दशाननः ।।
सौवर्णगतां प्राप्तुं बर्हस्त्यक्तः शिखण्डिना।
वित्तेशानां गृहोद्यानाद्बहिः काकायतेऽधुना ।।

# प्रेमविवाहः

-डॉ. आशुतोषमाथुरः

वंचिता तेऽनुरागेण लुंठितास्मि प्रपीडिते-
त्यरुदद् भूयशो बाला रोषाकुलितवीक्षणा ।।
प्रियस्तस्यास्तदा ब्रूते सामान्यमेतदावयोः
कृतोद्वाहस्त्वया बाले पित्रा निष्कासितो गृहात् ।।१।।

कष्टात्कष्टम् समापन्ना कृतोद्वाहा त्वयाधम
इत्याक्रोशद् यदा बाला वाक्स्फुल्लिंगविमोचनी ।।
प्रियस्तस्यास्तदा ब्रूते सामान्यमेतदावयोर्
मातुः कोपाद् विमुक्तोहं दग्धस्ते क्रोधवह्निना ।।२।।

-आचार्यः
सेन्ट स्टीफन्स महाविद्यालयः
देहली विश्वविद्यालयः-देहली

# चलध्वनिः

-डॉ. अञ्जू रानी

परस्परं न मानवेषु मानवीयताऽधुना
न पादयोश्च संगतिर्न हस्तयोश्च सत्कृतिः।
न कर्मसु प्रवीणता न धार्मिकाश्च सद्गुणा
निलीयते समस्तसाधना चलध्वनौ सखे।। १ ।।

न बालकस्य रोदनं गृहे गृहे पदे पदे
न लालनं न पालनं न चिन्तनं तदीयकम्
चलध्वनिञ्च हस्तयोर्मुहुर्मुहर्निरीक्षते
निलीयते समस्त जीवनं मुखस्य यन्त्रके।। २।।



पतिर्न कांक्षति प्रियां प्रियाऽपि तं न सेवते
न तोषणं न पोषणं न रोषणं परस्परम्।
गृहस्य कर्मणीह वै रुचिस्तयोर्न दृश्यते
कथं विलीयते प्रियस्य रागवर्धिनीरतिः।। ३ ।।

गृहस्य बान्धवाश्च मूर्तिवद्विभान्ति कायया
मुखे कदापि हासनं कदापि कोपवासनम्।
ध्वनिं विना हसन्ति ते स्वरं विना वदन्ति भो
कथं विलीयते मतेर्विचारसारसम्पदा।। ४ ।।

स्वतर्जनीभिरत्र कर्मनिष्ठकर्मठा सदा
बलं विना दलं विना जलं विना जनं विना।
गृहे गृहे पदे पदे विभान्ति मानवास्तथा
विलीयतेऽनुराग भावना कथं परस्परम् ।। ५ ।।

न मे हृदा न ते हृदाऽत्र भूतलेषु सत्कथा
न यामि कुत्र केनचित् न भामि कुत्र केनचित्।
प्रभोः कृपाभिरत्र नो पले पले स्थिता जना
चलध्वनिं ततस्त्यजन्तु जीवनस्य कांक्षिणः ।।६ ।।

न   गीयते स्वगीतिभिर्न नीयते स्वनीतिभि-
र्न लीयते स्वलीलया न चीयते स्वचेतसा।
भवन्ति सर्वदा खग मृगा प्रभो र्हिं खेलनै-
र्न मानवारस्थितारचलध्वनेर्कृपाभिरत्र भो।। ७।।

- प्रवक्ता संस्कृत
राजकीय इण्टर कॉलेज नोएड़ा
सैक्टर-१२, उत्तर प्रदेशः

# भारतभूमे! तव जयगानम्

-डॉ. सर्वेशकुमारमिश्रः

भारतभूमे! भारतमातः!
तव जयगानम् भारतमातः!।
तव जयगानम् तव जयगानम्
भारतभूमे! तव जयगानम् ।। १।।



कोऽयं बालः? कोऽयं बालः?
देहि परिचयं कोऽयं बालः?।
कस्त्वं बालक! कस्त्वं बालक!
देहि परिचयं कस्त्वं बालक! ।।२ ।।

पूज्यबापोः साधनाऽहम्
आजादशेखरकल्पनाऽहम्
चंद्रसुभाषस्य कामनाऽहम्
शहीदभगतजनसंवेदनाऽहम् ।।३।।

भारतभूमे! भारतमातः!
तव जयगानम् भारतमातः! ।
तव जयगानम् तव जयगानम्
भारतभूमे! तव जयगानम् ।। ४ ।।

शुद्धाचरणस्य रीतिकाऽहम्
राष्ट्रदेव्याः दीपिकाऽहम्।
गुरुजनानाम् संसर्जनाऽहम्
भ्रमितजनानाम् संचेतनाऽहम् ।।५।।

भारतभूमे! भारतमातः!
तव जयगानम् भारतमातः! ।
तव जयगानम् तव जयगानम्
भारतभूमे! तव जयगानम् ।।६।।

निजजननीकृतसंकल्पनाऽहम्
पूज्यभारतस्य प्रेरणाऽहम् ।
निजशिष्यानाम् भावनाऽहम्
गुरुवर्याणाम् सद्भावनाऽहम् ।। ७ ।।

भारतभूमे! भारतमात:!
तवजयगानम् भारतमात:! ।
तव जयगानम् तव जयगानम्
भारतभूमे! तव जयगानम् ।।८।।

अहम् कवि: रसिकजनानाम्
अपरछविस्तु संतजनानाम् ।
अहम् कवि: रसिकजनानाम्
रविरालम्बो अंधजनानाम् ।। ९।।

भारतभूमे! भारतमात:!
तव जयगानम् भारतमात:!।
तव जयगानम् तव जयगानम्
भारतभूमे! तव जयगानम् ।। १०।।

नेत्रज्योति: पितृजनानाम्
नेत्रज्योति: पितृजनानाम् ।
शनिरूपोऽहम् दुष्टजनानाम्
शनिरूपोऽहम् दुष्टजनानाम् ।।११।।

भारतभूमे! भारतमात:!
तव जयगानम् भारतमात:! ।
तव जयगानम् तव जयगानम्
भारतभूमे! तव जयगानम् ।।१२।।

**-काशीकुंज जमुनीपुरम् प्रयागराज:,**
**उत्तर प्रदेश:**

# वासुदेवप्रसादः

-डॉ. ऋषिराजपाठकः

वन्दे तं देवकीपुत्रं श्रीकृष्णं परमं गुरुम्।
यत्कृपालेशतोऽवाप्ता स्थायिवृत्तिर्मया पुनः ।।१।।

निसर्गकठिना वृत्तिर्विश्वविद्यालयादिषु।
नियुक्त्यै चयनं नूनं राजनीतिवशीकृतम् ।।२।।



तथापि स्थेयसी वृत्तिर्विषमे समुपस्थिता।
वासुदेवप्रसादान्मे वन्दे तं माधवं पुनः ।। ३।।

यस्य प्रसादान्मे ब्राह्मी वृत्तिर्जाता यशस्विनी।
तस्मै श्रीवासुदेवाय वृत्तिदाय नमो नमः ।।४।।

शासीनिकायाध्यक्ष्याय महाविद्यालये मम।
प्रेरितः प्रेषितो येन गुरुस्तं नौमि माधवम् ।।५।।

आध्यक्ष्ये मद्‌गुरोर्येन साक्षात्कारः सुकारितः।
प्राचार्याद्याश्च मत्पक्षे तं बन्दे नन्दनन्दनम् ।।६।।

सर्वदा यस्य वात्सल्यलालितोऽस्मि दिवानिशम् ।
निश्चिन्तः पठने लीनस्तं वन्दे यदुनन्दनम् ।।७।।

'ऋषि'स्तुतोऽसौ भगवान् भुक्तिमुक्तिवरप्रदः।
मह्यं मुक्तिप्रदानेन नाशयेन्मम बन्धनम् ।।८।।

बहूनामेमि प्रथमो बहूनामेमि मध्यमः
तथापि स्थेयसी वृत्तिर्मयाद्यावधि नाप्यते ।।९।।

राजनीतिबलाभावात् स्थायिवृत्त्या न लालनम्।
किन्तु वाग्देवताक्रोडे लालनं स्थायि मे भृशम् ।।१०।।

कैशोर्याद् यैः साकं कवितामञ्चः स्पृष्टो मया तेऽपि।
कुलगुरवः सुपरिचिताः स्थायित्वं मे न कुर्वन्ति ।।११।।

परिचय-चरणचुम्बनाऽऽशंसा-दलाश्रय नेत्रनुज्ञाभ्यः।
धन-सौन्दर्य-कुभोगात् स्थेयश्चयनं प्रायशोऽस्ति ।।१२।।

कदाचित् स द्रवीभूतः श्रीकृष्णः परमो गुरुः।
राजनीति-विहीनां मे स्थायिवृत्तिं प्रदास्यति ।।१३।।

**-आचार्यः,**
**श्यामाप्रसाद मुखर्जी महाविद्यालयः**
**पञ्जाबीबागः, नवदेहली**

# ‘ द्विजराजः ’

-डॉ. युवराजभट्टाराई

चलसीह नु तारकिते गगने,
प्रभया हृदि कौतुकतां भरसि।
रजनीकर! सोम! तमो हरसि,
द्विजराज! सदा मधुरं हससि ॥१॥

सुखदं तव दर्शनमस्ति सदा,
गिरिशो वहतीह मुदा शिरसा।
प्रकृतौ तव सास्ति सुशीतलता,
तिमिरेऽत्र चकास्सि विभासि तथा ॥२॥

उडुराज! विभासि यदा दिवि रे!,
उडवो भुवि भान्ति तदैव सखे!।
उडुभिः द्युतिरस्ति तवैव हृता,
शिशिरैः किरणैः लसतीह धरा ॥३॥

त्वयि सन्ति कलाः सकलाः रुचिराः,
भव चन्द्रनिभो निगदन्ति जनाः।
कतिभिस्तु मुखं तुलितं त्वयका,
अयि रात्रिपते! त्वयि मे कविता॥४॥

भुवने किरसीह करैरमृतम्,
शिशुबालजनेषु समुल्लसनम्।
कुरुषे युवमानसमारभरम्,
अथ वृद्ध-वरिष्ठ-जनेषु सुखम् ॥५॥

सघनं तिमिरं कवलीकुरुषे,
प्रसभं रसिकस्य मनोहरसे।
प्रभया तव कैरविणी हसति,
सुचकोरखगोऽपि तृषां हरति ॥६॥

तव गोचरतास्ति सखे! गगने,
सहसैव घने विनिगूहसि रे!।
जलदेन समं खलु खेलसि किम्?,
द्विजराज! गृहं मम गच्छसि किम्? ।।७।।

शृणु मामकमित्र! शुभं वचनम्,
उदयेन च ते हृदि मेऽस्ति सुखम्।
वदने मम पश्य मयैव समम्,
गृहमेहि मया सह खेल चिरम् ।।८।।

जननी मम वक्ति सदा गगने,
शशिनं परिदर्श्य गते जलदे।
मुखमस्ति ममापि सुधांशुसमम्,
वद चन्दिर! मेऽस्ति तथा वदनम्? ।।९।।

गगनाङ्गणमेव सदाश्रयसे,
भुवनेऽवतरिष्यसि किं भण रे!।
श्रुतवान् शतधा तव चित्रकथाः,
परिदर्शय सम्प्रति चन्द्रकलाः।।१०

नवनीरदनीलघने तिमिरे,
सुखशेवधिरस्ति शशी भुवने।
द्विजराजपदप्रचितोऽस्ति शशी,
युवराजकृता कवितापि शशी।।११

-अध्यापकः, बालभारती पब्लिक विद्यालयः,
गंगाराममार्गः, करोलबागः, नवदेहली

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347—1565 )

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

## मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

# "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित